# Ganesha Stuti by Prakriti and Purusha

# ગણેશસ્તુતિઃ પ્રકૃતિપુરુષયોઃ

## Document Information

Text title : Ganesha Stuti by Prakriti and Purusha

File name : gaNeshastutiHprakRRitipuruShayoH.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 6

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ગણેશસ્તુતિઃ પ્રકૃતિપુરુષયોઃ

શ્રીગણેશાય નમઃ ।
પ્રકૃતિપુરુષાવૂચતુઃ ।
નમસ્તે ગણનાથાય સ્વસંવેદ્યમયાય તે ।
નિરાકારસ્વરૂપા વૈ શુણ્ડા યસ્ય વિરાજતે ॥ ૩૧॥

યસ્ય દેહશ્ચ સાકારઃ કણ્ઠાધઃ પરિકથ્યતે ।
અભેદ એતયોર્જાતસ્તેન ત્વં વૈ ગજાનન ॥ ૩૨॥

ચતુર્વિધં નિજાનન્દાદ્વેદેષુ કથિતં ભવેત્ ।
એકમવ્યક્તરૂપં ચ દ્વિતીયં સમરૂપકમ્ ॥ ૩૩॥

તૃતીય સત્સ્વરૂપં ચ ચતુર્થં યત્સદા હ્યસત્ ।
ચતુર્હસ્તસ્વરૂપં તે તેન ત્વં વૈ ચતુર્ભુજઃ ॥ ૩૪॥

તવોદરે સ્થિતં સર્વં તેન લમ્બોદરઃ સ્મૃતઃ ।
માયામાયિકરૂપં ચ દ્વૌ પાદૌ દ્વિવિધં ચ તે ॥ ૩૫॥

એતે સર્વે ગણા ઢુણ્ઢે ત્વદીયા નાત્ર સંશયઃ ।
ગણનાથોઽસિ તેન ત્વં નામ્ના ખ્યાતશ્ચ સર્વદા ॥ ૩૬॥

એતાદૃશો નિજાત્માસાવાવયોર્ધ્યાન આવભૌ ।
સ્વસંવેદ્યતયા ધ્યાતો ભક્તાનુગ્રહકારકઃ ॥ ૩૭॥

ભક્તાભિમાનભાવેન દેહધારી સ્વયં હ્યભૂત્ ।
એતૈશ્ચ લક્ષણૈર્યુક્તો ગણેશો નામધારકઃ ॥ ૩૮॥

ધન્યં સર્વં કૃતં સ્વામિન્ યેન ત્વં દેહવાનભૂઃ ।
સ્વાનન્દવાસભૃત સાક્ષાદ્ હૃદિ નિત્યં સ્થિરો ભવ ॥ ૩૯॥

નમસ્તે વિઘ્નરાજાય નમસ્તે વિઘ્નહારિણે ।
ભક્તાનાં વૈ હ્યભક્તાનાં વિનકર્ત્રે નમોઽસ્તુ તે ॥ ૪૦॥

કર્મણાં ફલદાત્રે ચ જ્ઞાનાનાં સિદ્ધિદાયિને ।
અમેયશક્તયે તુભ્યં સર્વાધારાય તે નમઃ ॥ ૪૧॥

કિં કર્તવ્યં દયાસિંધો તદેવાજ્ઞાપય પ્રભો ।
તવ ભક્તિં મહાતીવ્રાં દેહિ નૌ ગણનાયક ॥ ૪૨॥

એવં સ્તુતિં સમાકાર્ણ્ય પરિતુષ્ટો ગણાધિપઃ ।
મેઘગમ્ભીરયા વાચા હર્ષયન્નબ્રવીત્તદા ॥ ૪૩॥

શ્રીગણેશ ઉવાચ ।
સાધુ સાધુ મહાભાગૌ યદુક્તં સ્તોત્રમુત્તમમ્ ।
મમ પ્રીતિકરં સર્વકામદં પ્રભવિષ્યતિ ॥ ૪૪॥

ધર્માર્થકામમોક્ષાણાં દાયકં પુષ્ટિવર્ધનમ્ ।
કારાગૃહસ્થિતાનાં ચ મોચકં લક્ષપાઠતઃ ॥ ૪૫॥

મારણોચ્ચાટનાદીનાં નાશકં તત્તથૈવ ચ ।
એકવિંશતિવારં યઃ એકવિંશદ્દિનાવધિ ॥ ૪૬॥

પઠેત્તુ યદિ વૈભક્ત્યા સ ઈપ્સિતફલં લભેત્ ।
બ્રહ્મભૂયકરં ચૈતન્નિષ્કામપઠનાદ્ભવેત્ ॥ ૪૭॥

ભવતોસ્તપસા તુષ્ટઃ સ્તોત્રેણાનેન ભાવતઃ ।
પ્રીતો દાસ્યામિ સમ્પૂર્ણં ભવદ્ભ્યામીપ્સિતં ચ યત્ ॥ ૪૮॥

બિન્દુમાત્રસ્વરૂપેણ યત્સ્થિતં બ્રહ્મ શાશ્વતમ્ ।
તસ્માચ્ચતુર્વિધં વિશ્વં પ્રકટં સમ્ભવિષ્યતિ ॥ ૪૯॥

પ્રકર્ષેણ ચ સર્વેષાં કૃતિસ્તસ્માદ્વિનિઃસૃતા ।
પ્રકૃતિસ્તેન તે નામ ભવિષ્યતિ જનેષ્વિદમ્ ॥ ૫૦॥

સૃષ્ટ્વા ચતુર્વિધં વિશ્વં બન્ધહીના ભવિષ્યસિ ।
મદીયાં ભક્તિમચલાં પ્રકૃતે પ્રાપ્સ્યસિ ધ્રુવમ્ ॥ ૫૧॥

જનાસ્ત્વદીયભક્તિં યે કરિષ્યન્તિ સકામતઃ ।
નિષ્કામતશ્ચ તેભ્યસ્ત્વં સર્વં દાસ્યસિ શોભને ॥ ૫૨॥

ચતુર્વિધેપ્યયં શેતે પુરે તેનૈવ પૂરુષઃ ।
સોઽહમ્માત્રાત્મકો ભાવી નાના સર્વત્ર તિષ્ઠતુ ॥ ૫૩॥

સર્વાકારવિહીનોઽયં તત્ર ભ્રાન્તો ભવિષ્યતિ ।

બિમ્બબિમ્બિતભાવેન પ્રકૃતૌ મોહિતઃ સદા ॥ ૫૪॥

સ્વયં મોહવિહીનઃ સ સોઽહંમાત્રાત્મકઃ સદા ।
મત્પ્રસાદાદ્ભવેન્નિત્યં બ્રહ્મ સોઽહં સુખાત્મકઃ ॥ ૫૫॥

મદીયા ભક્તિરચલા ભવિષ્યતિ તવાપિ ચ ।
તયા બન્ધવિહીનસ્ત્વં તથા માન્યો ભવિષ્યસિ ॥ ૫૬॥

તવ ભક્તિં કરિષ્યન્તિ જના ભાવેન સંયુતાઃ ।
તેભ્યસ્તદીપ્સિતં સર્વં દાસ્યસિ ત્વં ન સંશયઃ ॥ ૫૭॥

બ્રહ્મભૂયપદં ચૈવ દાસ્યસે યોગસેવયા ।
સાક્ષાત્પુરુષરૂપસ્ત્વં સર્વસત્તાત્મકો ભવ ॥ ૫૮॥

પ્રકૃતૌ વીર્યમાધત્સ્વ સર્વસત્તાત્મકં વિભો ।
તેનેયં સર્વસૂર્વિશ્વં સૃજિષ્યતિ ન સંશયઃ ॥ ૫૯॥

સૃષ્ટ્વા ચતુર્વિધં સર્વં પાલનં હરણં તથા ।
કર્તવ્યં કાલયોગેન કરણીયમિદં સ્મૃતમ્ ॥ ૬૦॥

સર્વેષાં પ્રકૃતિર્માતા પિતા પુરુષ ઉચ્યતે ।
નાનારૂપાણિ નામાનિ કલ્પયિષ્યન્તિ વૈ જનાઃ ॥ ૬૧॥

ઇત્યુક્ત્વા ગણરાજસ્તુ તત્રૈવાન્તરધીયત ।
પ્રકૃતિઃ પુરુષશ્ચૈવ યથાજ્ઞપ્તૌ પ્રચક્રતુઃ ॥ ૬૨॥

ઇતિ પ્રકૃતિપુરુષયોઃ ગણેશસ્તુતિઃ । ૧.૬

---

*Ganesha Stuti by Prakriti and Purusha*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*